Reg. No. | | | | | | | | | |

**BCASKLN 201**

# Second Semester B.C.A. Degree Examination, September 2022
## (NEP – 2020) (2021-22 Batch Onwards)
## SANSKRIT LANGUAGE (AECC)
## Samskritam

Time : 2 Hours

Max. Marks : 60

***सूचना :*** *1)* ***संस्कृत****भाषया,* ***कर्णाटक****भाषया,* ***आङ्ग्ल****भाषया वा उत्तराणि लिखत ।*

*2) प्रश्नसङ्ख्या* ***IV*** *तथा* ***V*** *– एतयो: उत्तराणि* ***संस्कृत****भाषया एव लेखनीयानि ।*

I. **एकं** अनुवादं कृत्वा विवृणुत । **(1×5=5)**

1) वेदमनूच्य आचार्योऽन्तेवासिनम् अनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमद: । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी: । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपित्रृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।

2) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम् , अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम् । विशेषेण तु राज्ञाम् । विरला हि तेषाम् उपदेष्टार: । प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात् । उद्दामदर्पश्वयथुस्थगितश्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वन्ति । शृण्वन्तोऽपि च गजनिमीलितेनावधीरयन्त:, खेदयन्ति हितोपदेशदायिनो गुरून् । अहङ्कारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृति: ।

II. **चत्वारि** वाक्यानि सप्रसङ्गं विवृणुत । **(4×3=12)**

1) अन्यबन्धे मन्त्रबन्धो विनश्यति ।

2) किं धर्मविमोहाद् धाष्ट्र्याद् वा हतवान् असि ?

3) कुतो मे मन्दभाग्यस्य आहारेऽभिलाष: ?

4) दु:खिषु करुणा हि महतां शैली ।

5) तव अवशस्य विनाशाय अयं घट: जात: ।

6) राहुजिह्वा धर्मेन्दुमण्डलस्य ।

P.T.O.

III. **त्रीन्** प्रश्नान् प्रबन्धरूपेण उत्तरयत । **(3×8=24)**

1) रावण–हनूमतोः सम्भाषणं लङ्कादहनं च अधिकृत्य लिखत ।

2) ‘मण्डूकाः सर्पमधिरोहन्ति’ इति कथां तस्याः नीतिं च विशदयत ।

3) दरिद्रः हरिशर्मा दैवानुग्रहेण सामन्तसन्निभः कथं बभूव ? विवृणुत ।

4) बाणोक्तरीत्य लक्ष्मीमदं वर्णयत ।

5) अद्वैतमतप्रतिपादकं श्रीशङ्कराचार्यम् अधिकृत्य प्रबन्धमेकं लिखत ।

IV. **एकं संस्कृतेन** टिप्पणीं लिखत । **(1×4=4)**

1) उपनिषत् ।

2) पञ्चतन्त्रम् ।

3) महाभारतम् ।

V. निर्देशानुसारं **पञ्चदश**वाक्यानि पूरयत । **(15×1=15)**

अ) रेखाङ्कितपदस्य कारकं सूचयत ।

1) अयोध्यायां दशरथः आसीत् । (कर्तृ, कर्म, करणम्)

2) हनूमान् लङ्कां ददाह । (कर्तृ, कर्म, सम्प्रदानम्)

3) वानरः मुष्टिप्रहारैः तर्जितः । (करणं, कर्म, सम्प्रदानम्)

4) राजकुले जिह्वेति चेटी आसीत् । (अपादानम्, अधिकरणं, सम्प्रदानम्)

5) तुभ्यं दिव्यनयनं ददामि । (अपादानम्, करणं, सम्प्रदानम्)

आ) वाक्यदोषान् परिहरत ।

6) अहं धार्तराष्ट्रे सह वसितुम् नोत्सुकामि ।

7) अहं तव विक्रमेण पतितः ।

8) त्वं मण्डूकानां वाहनं भविष्यामि ।

9) भवान् शशिशीतलो भव ।

10) महाराजा अब्रवीत् ।

इ) सन्धिनाम लिखत ।

11) राजा + ऋषिः = राजर्षिः । (गुणसन्धिः, वृद्धिसन्धिः, यण्सन्धिः)

12) सभा + आस्थाने = सभास्थाने । (गुणसन्धिः, वृद्धिसन्धिः, सवर्णदीर्घसन्धिः)

13) मुक्तो + अपि = मुक्तोऽपि । (वृद्धिसन्धिः, पूर्वरूपसन्धिः, गुणसन्धिः)

14) ननु + अपि = नन्वपि । (श्चुत्वसन्धिः, जश्त्वसन्धिः, यण्सन्धिः)

15) तत् + च = तच्च । (यण्सन्धिः, श्चुत्वसन्धिः, जश्त्वसन्धिः)

ई) समासनाम सूचयत ।

16) महान् च असौ बाहुः च – महाबाहुः । (कर्मधारयः, द्वन्द्वः, तत्पुरुषः)

17) राक्षसानां राजा – राक्षसराजः । (तत्पुरुषः, कर्मधारयः, बहुव्रीहिः)

18) इन्दुः इव मुखं यस्याः सा – इन्दुमुखी । (कर्मधारयः, बहुव्रीहिः, द्विगुः)

19) परिवारेण सह – सपरिवारम् । (कर्मधारयः, तत्पुरुषः, अव्ययीभावः)

20) न ऋतम् – अनृतम् । (कर्मधारयः, नञ्तत्पुरुषः, द्विगुः)

---